# श्रीमद् भागवत रसिक कुटुंब

## श्रीराधिकासहस्रनामस्तोत्रम्

श्रीश्रीराधिकायै नमः

श्रीपार्वत्युवाच -

देवदेव जगन्नाथ, भक्तानुग्रहकारक ।
यद्यस्ति मयि कारुण्यं(यँ), यद्यस्ति मयि ते दया ॥ १॥

यद्यत् त्वया निगदितं(न्), तत्सर्वं मे श्रुतं प्रभो ।
गुह्याद् गुह्यतरं(यँ) यत्तु, यत्ते मनसि काशते ॥ २॥

त्वया न गदितं(यँ) यत्तु, यस्मै कस्मै कदाचन ।
तस्मात् कथय देवेश, सहस्रं(न्) नाम चोत्तमम् ॥ ३॥

श्रीराधाया महादेव्या, गोप्या भक्तिप्रसाधनम् ।
ब्रह्माण्डकर्त्री हर्त्री सा, कथं(ङ्) गोपीत्वमागता ॥ ४॥

श्रीमहादेव उवाच -

शृणु देवि विचित्रार्थां(ङ्), कथां पापहरां शुभाम् ।
नास्ति जन्मानि कर्माणि, तस्या नूनं महेश्वरि ॥ ५॥

यदा हरिश्चरित्राणि, कुरुते कार्यगौरवात् ।
तदा विधत्ते रूपाणि, हरिसान्निध्यसाधिनी ॥ ६॥

तस्या गोपीत्वभावस्य, कारणं(ङ्) गदितं पुरा ।
इदानीं शृणु देवेशि, नाम्नां(ञ्) चैव सहस्रकम् ॥ ७॥

यन्मया कथितं(न्) नैव, तन्त्रेष्वपि कदाचन ।
तव स्नेहात्प्रवक्ष्यामि, भक्त्या धार्यं मुमुक्षुभिः ॥ ८॥

मम प्राणसमा विद्या, भाव्यते मे त्वहर्निशम् ।
शृणुष्व गिरिजे नित्यं, पठस्व च यथामति ॥ ९॥

यस्याः(फ्) प्रसादात् कृष्णस्तु, गोलोकेशः(फ्) परः(फ्) प्रभुः ।
अस्या नामसहस्रस्य, ऋषिर्नारद एव च ।
देवी राधा परा प्रोक्ता, चतुर्वर्गप्रसाधिनी ॥ १०॥

॥अथ सहस्रनामस्तोत्रम् ॥

श्रीराधा राधिका कृष्ण- वल्लभा कृष्णसंयुता ।
वृन्दावनेश्वरी कृष्ण- प्रिया मदनमोहिनी ॥ ११॥

श्रीमती कृष्णकान्ता च, कृष्णानन्दप्रदायिनी ।
यशस्विनी यशोगम्या, यशोदानन्दवल्लभा ॥ १२॥

दामोदरप्रिया गोपी, गोपानन्दकरी तथा ।
कृष्णाङ्गवासिनी हृद्या, हरिकान्ता हरिप्रिया ॥ १३॥

प्रधानगोपिका गोप-कन्या त्रैलोक्यसुन्दरी ।
वृन्दावनविहारिणी, विकसितमुखाम्बुजा ॥ १४॥

गोकुलानन्दकर्त्री च, गोकुलानन्ददायिनी ।
गतिप्रदा गीतगम्या, गमनागमनप्रिया ॥ १५॥

विष्णुप्रिया विष्णुकान्ता, विष्णोरङ्कनिवासिनी ।
यशोदानन्दपत्नी च, यशोदानन्दगेहिनी ॥ १६॥

कामारिकान्ता कामेशी, कामलालसविग्रहा ।
जयप्रदा जया जीवा, जीवानन्दप्रदायिनी ॥ १७॥

नन्दनन्दनपत्नी च, वृषभानुसुता शिवा ।
गणाध्यक्षा गवाध्यक्षा, गवां(ङ्) गतिरनुत्तमा ॥ १८॥

काञ्चनाभा हेमगात्रा, काञ्चनाङ्गदधारिणी ।
अशोका शोकरहिता, विशोका शोकनाशिनी ॥ १९॥

गायत्री वेदमाता च, वेदातीत विदुत्तमा ।
नीतिशास्त्रप्रिया नीतिर्-गतिर्मतिरभीष्टदा ॥ २०॥

वेदप्रिया वेदगर्भा, वेदमार्गप्रवर्द्धिनी ।
वेदगम्या वेदपरा, विचित्रकनकोज्ज्वला ॥ २१॥

तथोज्ज्वलप्रदानित्या, तथैवोज्ज्वलगात्रिका ।
नन्दप्रिया नन्दसुता- राध्याऽऽनन्दप्रदा शुभा ॥ २२॥

शुभाङ्गी विमलाङ्गी च, विलासिन्यपराजिता ।
जननी जन्मशून्या च, जन्ममृत्युजरापहा ॥ २३॥

गतिर्गतिमतां(न्) धात्री, धात्र्यानन्दप्रदायिनी ।
जगन्नाथप्रिया शैल- वासिनी हेमसुन्दरी ॥ २४॥

किशोरी कमला पद्मा, पद्महस्ता पयोददा ।
पयस्विनी पयोदात्री, पवित्री सर्वमङ्गला ॥ २५॥

महाजीवप्रदा कृष्ण-कान्ता कमलसुन्दरी ।
विचित्रवासिनी चित्र-वासिनी चित्ररूपिणी ॥ २६॥

निर्गुणा सुकुलीना च, निष्कुलीना निराकुला ।
गोकुलान्तरगेहा च, योगानन्दकरी तथा ॥ २७॥

वेणुवाद्या वेणुरतिर्- वेणुवाद्यपरायणा ।
गोपालस्य प्रिया सौम्य- रूपा सौम्यकुलोद्वहा ॥ २८॥

मोहामोहा विमोहा च, गतिनिष्ठा गतिप्रदा ।
गीर्वाणवन्द्या गीर्वाणा, गीर्वाणगणसेविता ॥ २९॥

ललिता च विशोका च, विशाखा चित्रमालिनी ।
जितेन्द्रिया शुद्धसत्त्वा, कुलीना कुलदीपिका ॥ ३०॥

दीपप्रिया दीपदात्री, विमला विमलोदका ।
कान्तारवासिनी कृष्णा, कृष्णचन्द्रप्रिया मतिः ॥ ३१॥

अनुत्तरा दुःखहन्त्री, दुःखकर्त्री कुलोद्वहा ।
मतिर्लक्ष्मीर्धृतिर्लज्जा, कान्तिः(फ्) पुष्टिः(स्) स्मृतिः क्षमा ॥ ३२॥

क्षीरोदशायिनी देवी, देवारिकुलमर्दिनी ।
वैष्णवी च महालक्ष्मीः(ख्), कुलपूज्या कुलप्रिया ॥ ३३॥

संहर्त्री सर्वदैत्यानां, सावित्री वेदगामिनी ।
वेदातीता निरालम्बा, निरालम्बगणप्रिया ॥ ३४॥

निरालम्बजनैः(फ्) पूज्या, निरालोका निराश्रया ।
एकाङ्गी सर्वगा सेव्या, ब्रह्मपत्नी सरस्वती ॥ ३५॥

रासप्रिया रासगम्या, रासाधिष्ठातृदेवता ।
रसिका रसिकानन्दा, स्वयम् रासेश्वरी परा ॥ ३६॥

रासमण्डलमध्यस्था, रासमण्डलशोभिता ।
रासमण्डलसेव्या च, रासक्रीडामनोहरा ॥ ३७॥

**पुण्डरीकाक्षनिलया, पुण्डरीकाक्षगेहिनी ।**
**पुण्डरीकाक्षसेव्या च, पुण्डरीकाक्षवल्लभा ॥ ३८॥**

**सर्वजीवेश्वरी सर्व-जीववन्द्या परात्परा ।**
**प्रकृतिः(श्) शम्भुकान्ता च, सदाशिवमनोहरा ॥ ३९॥**

**क्षुत् पिपासा दया निद्रा, भ्रान्तिः(श्) श्रान्तिः(ह्) क्षमाकुला ।**
**वधूरूपा गोपपत्नी, भारती सिद्धयोगीनी ॥ ४०॥**

**सत्यरूपा नित्यरूपा, नित्याङ्गी नित्यगेहिनी ।**
**स्थानदात्री तथा धात्री, महालक्ष्मीः(स्) स्वयम्प्रभा ॥ ४१॥**

**सिन्धुकन्याऽऽस्थानदात्री, द्वारकावासिनी तथा ।**
**बुद्धिः(स्) स्थितिः(स्) स्थानरूपा, सर्वकारणकारणा ॥ ४२॥**

**भक्तप्रिया भक्तगम्या, भक्तानन्दप्रदायिनी ।**
**भक्तकल्पद्रुमातीता, तथातीतगुणा तथा ॥ ४३॥**

**मनोऽधिष्ठातृदेवी च, कृष्णप्रेमपरायणा ।**
**निरामया सौम्यदात्री, तथा मदनमोहिनी ॥ ४४॥**

**एकानंशाशिवा क्षेमा, दुर्गा दुर्गतिनाशिनी ।**
**ईश्वरी सर्ववन्द्या च, गोपनीया शुभङ्करी ॥ ४५॥**

**पालिनी सर्वभूतानां(न्), तथा कामाङ्गहारिणी ।**
**सद्यो मुक्तिप्रदा देवी, वेदसारा परात्परा ॥ ४६॥**

**हिमालयसुता सर्वा, पार्वती गिरिजा सती ।**
**दक्षकन्या देवमाता, मन्दलज्जा हरेस्तनूः ॥ ४७॥**

**वृन्दारण्यप्रिया वृन्दा, वृन्दावनविलासिनी ।**
**विलासिनी वैष्णवी च, ब्रह्मलोकप्रतिष्ठिता ॥ ४८॥**

**रुक्मिणी रेवती सत्य- भामा जाम्बवती तथा ।**
**सुलक्ष्मणा मित्रविन्दा, कालिन्दी जह्नुकन्यका ॥ ४९॥**

**परिपूर्णा पूर्णतरा, तथा हैमवती गतिः ।**
**अपूर्वा ब्रह्मरूपा च, ब्रह्माण्डपरिपालिनी ॥ ५०॥**

**ब्रह्माण्डभाण्डमध्यस्था, ब्रह्माण्डभाण्डरूपिणी ।**
**अण्डरूपाण्डमध्यस्था, तथाण्डपरिपालिनी ॥ ५१॥**

**अण्डबाह्याण्डसंहर्त्री, शिवब्रह्महरिप्रिया ।**
**महाविष्णुप्रिया कल्प-वृक्षरूपा निरन्तरा ॥ ५२॥**

**सारभूता स्थिरा गौरी, गौराङ्गी शशिशेखरा ।**
**श्वेतचम्पकवर्णाभा, शशिकोटिसमप्रभा ॥ ५३॥**

मालतीमाल्यभूषाढ्या, मालतीमाल्यधारिणी ।
कृष्णस्तुता कृष्णकान्ता, वृन्दावनविलासिनी ॥ ५४॥

तुलस्यधिष्ठातृदेवी, संसारार्णवपारदा ।
सारदाऽऽहारदाम्भोदा, यशोदा गोपनन्दिनी ॥ ५५॥

अतीतगमना गौरी, परानुग्रहकारिणी ।
करुणार्णवसम्पूर्णा, करुणार्णवधारिणी ॥ ५६॥

माधवी माधवमनो-हारिणी श्यामवल्लभा ।
अन्धकारभयध्वस्ता, मङ्गल्या मङ्गलप्रदा ॥ ५७॥

श्रीगर्भा श्रीप्रदा श्रीशा, श्रीनिवासाच्युतप्रभा ।
श्रीरूपा श्रीहरा श्रीदा, श्रीकामा श्रीस्वरूपिणी ॥ ५८॥

श्रीदामानन्ददात्री च, श्रीदामेश्वरवल्लभा ।
श्रीनितम्बा श्रीगणेशा, श्रीस्वरूपाश्रिता श्रुतिः ॥ ५९॥

श्रीक्रियारूपिणी श्रीला, श्रीकृष्णभजनान्विता ।
श्रीराधा श्रीमती श्रेष्ठा, श्रेष्ठरूपा श्रुतिप्रिया ॥ ६०॥

योगेशी योगमाता च, योगातीता युगप्रिया ।
योगप्रिया योगगम्या, योगिनीगणवन्दिता ॥ ६१॥

**जवाकुसुमसङ्काशा, दाडिमीकुसुमोपमा ।**
**नीलाम्बरधरा धीरा, धैर्यरूपधराधृतिः ॥ ६२॥**

**रत्नसिंहासनस्था च, रत्नकुण्डलभूषिता ।**
**रत्नालङ्कारसंयुक्ता, रत्नमालाधरा परा ॥ ६३॥**

**रत्नेन्द्रसारहाराढ्या, रत्नमालाविभूषिता ।**
**इन्द्रनीलमणिन्यस्त- पादपद्मशुभा शुचिः ॥ ६४॥**

**कार्त्तिकी पौर्णमासी च, अमावस्या भयापहा ।**
**गोविन्दराजगृहिणी, गोविन्दगणपूजिता ॥ ६५॥**

**वैकुण्ठनाथगृहिणी, वैकुण्ठपरमालया ।**
**वैकुण्ठदेवदेवाढ्या, तथा वैकुण्ठसुन्दरी ॥ ६६॥**

**मदालसा वेदवती, सीता साध्वी पतिव्रता ।**
**अन्नपूर्णा सदानन्द-रूपा कैवल्यसुन्दरी ॥ ६७॥**

**कैवल्यदायिनी श्रेष्ठा, गोपीनाथमनोहरा ।**
**गोपीनाथेश्वरी चण्डी, नायिकानयनान्विता ॥ ६८॥**

**नायिका नायकप्रीता, नायकानन्दरूपिणी ।**
**शेषा शेषवती शेष-रूपिणी जगदम्बिका ॥ ६९॥**

गोपालपालिका माया, जायाऽऽनन्दप्रदा तथा ।
कुमारी यौवनानन्दा, युवती गोपसुन्दरी ॥ ७०॥

गोपमाता जानकी च, जनकानन्दकारिणी ।
कैलासवासिनी रम्भा, वैराग्यकुलदीपिका ॥ ७१॥

कमलाकान्तग्रहिणी, कमला कमलालया ।
त्रैलोक्यमाता जगता- मधिष्ठात्री प्रियाम्बिका ॥ ७२॥

हरकान्ता हररता, हरानन्दप्रदायिनी ।
हरपत्नी हरप्रीता, हरतोषणतत्परा ॥ ७३॥

हरेश्वरी रामरता, रामा रामेश्वरी रमा ।
श्यामला चित्रलेखा च, तथा भुवनमोहिनी ॥ ७४॥

सुगोपी गोपवनिता, गोपराज्यप्रदा शुभा ।
अङ्गारपूर्णा माहेयी, मत्स्यराजसुतासती ॥ ७५॥

कौमारी नारसिंही च, वाराही नवदुर्गिका ।
चञ्चलाचञ्चलामोदा, नारी भुवनसुन्दरी ॥ ७६॥

दक्षयज्ञहरा दाक्षी, दक्षकन्या सुलोचना ।
रतिरूपा रतिप्रीता, रतिश्रेष्ठा रतिप्रदा ॥ ७७॥

**रतिलक्षणगेहस्था, विरजा भुवनेश्वरी ।**
**शङ्कास्पदा हरेर्जाया, जामातृकुलवन्दिता ॥ ७८॥**

**वकुला बकुलामोद- धारिणी यमुनाजया ।**
**विजया जयपत्नी च, यमलार्जुनभञ्जिनी ॥ ७९॥**

**वक्रेश्वरी वक्ररूपा, वक्रवीक्षणवीक्षिता ।**
**अपराजिता जगन्नाथा, जगन्नाथेश्वरी यतिः ॥ ८०॥**

**खेचरी खेचरसुता, खेचरत्वप्रदायिनी ।**
**विष्णुवक्षःस्थलस्था च, विष्णुभावनतत्परा ॥ ८१॥**

**चन्द्रकोटिसुगात्री च, चन्द्राननमनोहरा ।**
**सेवा सेव्याशिवाक्षेमा, तथा क्षेमकरी वधूः ॥ ८२॥**

**यादवेन्द्रवधूः(श्) शैब्या, शिवभक्ता शिवान्विता ।**
**केवला निष्फला सूक्ष्मा, महाभीमाभयप्रदा ॥ ८३॥**

**जीमूतरूपा जैमूती, जितामित्रप्रमोदिनी ।**
**गोपालवनिता नन्दा, कुलजेन्द्रनिवासिनी ॥ ८४॥**

**जयन्ती यमुनाङ्गी च, यमुनातोषकारिणी ।**
**कलिकल्मषभङ्गा च, कलिकल्मषनाशिनी ॥ ८५॥**

**कलिकल्मषरूपा च, नित्यानन्दकरी कृपा ।**
**कृपावती कुलवती, कैलासाचलवासिनी ॥ ८६॥**

**वामदेवी वामभागा, गोविन्दप्रियकारिणी ।**
**नरेन्द्रकन्या योगेशी, योगिनी योगरूपिणी ॥ ८७॥**

**योगसिद्धा सिद्धरूपा, सिद्धक्षेत्रनिवासिनी ।**
**क्षेत्राधिष्ठातृरूपा च, क्षेत्रातीता कुलप्रदा ॥ ८८॥**

**केशवानन्ददात्री च, केशवानन्ददायिनी ।**
**केशवा केशवप्रीता, केशवी केशवप्रिया ॥ ८९॥**

**रासक्रीडाकरी रास-वासिनी राससुन्दरी ।**
**गोकुलान्वितदेहा च, गोकुलत्वप्रदायिनी ॥ ९०॥**

**लवङ्गनाम्नी नारङ्गी, नारङ्गकुलमण्डना ।**
**एलालवङ्गकर्पूर- मुखवासमुखान्विता ॥ ९१॥**

**मुख्या मुख्यप्रदा मुख्य- रूपा मुख्यनिवासिनी ।**
**नारायणी कृपातीता, करुणामयकारिणी ॥ ९२॥**

**कारुण्या करुणा कर्णा, गोकर्णा नागकर्णिका ।**
**सर्पिणी कौलिनी क्षेत्र-वासिनी जगदन्वया ॥ ९३॥**

**जटिला कुटिला नीला, नीलाम्बरधरा शुभा ।**
**नीलाम्बरविधात्री च, नीलकण्ठप्रिया तथा ॥ ९४॥**

**भगिनी भागिनी भोग्या, कृष्णभोग्या भगेश्वरी ।**
**बलेश्वरी बलाराध्या, कान्ता कान्तनितम्बिनी ॥ ९५॥**

**नितम्बिनी रूपवती, युवती कृष्णपीवरी ।**
**विभावरी वेत्रवती, सङ्कटा कुटिलालका ॥ ९६॥**

**नारायणप्रिया शैला, सृक्कणीपरिमोहिता ।**
**दृक्पातमोहिता प्रात- राशिनी नवनीतिका ॥ ९७॥**

**नवीना नवनारी च, नारङ्गफलशोभिता ।**
**हैमी हेममुखी चन्द्र- मुखी शशिसुशोभना ॥ ९८॥**

**अर्धचन्द्रधरा चन्द्र-वल्लभा रोहिणी तमिः ।**
**तिमिङ्गिलकुलामोद-मत्स्यरूपाङ्गहारिणी ॥ ९९॥**

**कारिणी सर्वभूतानां(ङ्), कार्यातीता किशोरिणी ।**
**किशोरवल्लभा केश- कारिका कामकारिका ॥ १००॥**

**कामेश्वरी कामकला, कालिन्दीकूलदीपिका ॥१०१**

कलिन्दतनयातीर- वासिनी तीरगेहिनी ॥ १०२॥

कादम्बरीपानपरा, कुसुमामोदधारिणी ।
कुमुदा कुमुदानन्दा, कृष्णेशी कामवल्लभा ॥ १०३॥

तर्काली वैजयन्ती च, निम्बदाडिम्बरूपिणी ।
बिल्ववृक्षप्रिया कृष्णाम्-बरा बिल्वोपमस्तनी ॥ १०४॥

बिल्वात्मिका बिल्व- बसुर्बिल्ववृक्षनिवासिनी ।
तुलसीतोषिका तैति- लानन्दपरितोषिका ॥ १०५॥

गजमुक्ता महामुक्ता, महामुक्तिफलप्रदा ।
अनङ्गमोहिनी शक्ति- रूपा शक्तिस्वरूपिणी ॥ १०६॥

पञ्चशक्तिस्वरूपा च, शैशवानन्दकारिणी ।
गजेन्द्रगामिनी श्याम- लतानङ्गलता तथा ॥ १०७॥

योषिच्छक्तिस्वरूपा च, योषिदानन्दकारिणी ।
प्रेमप्रिया प्रेमरूपा, प्रेमानन्दतरङ्गिणी ॥ १०८॥

प्रेमहारा प्रेमदात्री, प्रेमशक्तिमयी तथा ।
कृष्णप्रेमवती धन्या, कृष्णप्रेमतरङ्गिणी ॥ १०९॥

प्रेमभक्तिप्रदा प्रेमा, प्रेमानन्दतरङ्गिणी ।
प्रेमक्रीडापरीताङ्गी, प्रेमभक्तितरङ्गिणी ॥ ११०॥

प्रेमार्थदायिनी सर्वश्-वेता नित्यतरङ्गिणी ।
हावभावान्विता रौद्रा, रुद्रानन्दप्रकाशिनी ॥ १११॥

कपिला शृङ्खला केश- पाशसम्बन्धिनी धटी ।
कुटीरवासिनी धूम्रा, धूम्रकेशा जलोदरी ॥ ११२॥

ब्रह्माण्डगोचरा ब्रह्म-स्वरूपिणी भवभाविनी ।
संसारनाशिनी शैवा, शैवलानन्ददायिनी ॥ ११३॥

शिशिरा हेमरागाढ्या, मेघरूपातिसुन्दरी ।
मनोरमा वेगवती, वेगाढ्या वेदवादिनी ॥ ११४॥

दयान्विता दयाधारा, दयारूपा सुसेविनी ।
किशोरसङ्गसंसर्गा, गौरचन्द्रानना कला ॥ ११५॥

कलाधिनाथवदना, कलानाथाधिरोहिणी ।
विरागकुशला हेम- पिङ्गला हेममण्डना ॥ ११६॥

भाण्डीरतालवनगा, कैवर्ती पीवरी शुकी ।
शुकदेवगुणातीता, शुकदेवप्रिया सखी ॥ ११७॥

विकलोत्कर्षिणी कोषा, कौशेयाम्बरधारिणी ।
कौषावरी कोषरूपा, जगदुत्पत्तिकारिका ॥ ११८॥

सृष्टिस्थितिकरी संहा-रिणी संहारकारिणी ।
केशशैवलधात्री च, चन्द्रगात्रा सुकोमला ॥ ११९॥

पद्माङ्गरागसंरागा, विन्ध्याद्रिपरिवासिनी ।
विन्ध्यालया श्यामसखी, सखीसंसाररागिणी ॥ १२०॥

भूता भविष्या भव्या च, भव्यगात्रा भवातिगा ।
भवनाशान्तकारिण्या- काशरूपा सुवेशिनी ॥ १२१॥

रतिरङ्गपरित्यागा, रतिवेगा रतिप्रदा ।
तेजस्विनी तेजोरूपा, कैवल्यपथदा शुभा ॥ १२२॥

भक्तिहेतुर्मुक्तिहेतुर्-लङ्घिनी लङ्घनक्षमा ।
विशालनेत्रा वैशाली, विशालकुलसम्भवा ॥ १२३॥

विशालगृहवासा च, विशालबदरीरतिः ।
भक्त्यतीता भक्तगतिर्-भक्तिका शिवभक्तिदा ॥ १२४॥

शिवभक्तिस्वरूपा च, शिवार्धाङ्गविहारिणी ।
शिरीषकुसुमामोदा, शिरीषकुसुमोज्ज्वला ॥ १२५॥

**शिरीषमृद्वी शैरीषी, शिरीषकुसुमाकृतिः ।**
**वामाङ्गहारिणी विष्णोः(श्), शिवभक्तिसुखान्विता ॥ १२६॥**

**विजिता विजितामोदा, गणगा गणतोषिता ।**
**हयास्या हेरम्बसुता, गणमाता सुखेश्वरी ॥ १२७॥**

**दुःखहन्त्री दुःखहरा, सेवितेप्सितसर्वदा ।**
**सर्वज्ञत्वविधात्री च, कुलक्षेत्रनिवासिनी ॥ १२८॥**

**लवङ्गा पाण्डवसखी, सखीमध्यनिवासिनी ।**
**ग्राम्यगीता गया गम्या, गमनातीतनिर्भरा ॥ १२९॥**

**सर्वाङ्गसुन्दरी गङ्गा, गङ्गाजलमया तथा ।**
**गङ्गेरिता पूतगात्रा, पवित्रकुलदीपिका ॥ १३०॥**

**पवित्रगुणशीलाढ्या, पवित्रानन्ददायिनी ।**
**पवित्रगुणसीमाढ्या, पवित्रकुलदीपिनी ॥ १३१॥**

**कल्पमाना कंसहरा, विन्ध्याचलनिवासिनी ।**
**गोवर्द्धनेश्वरी गोवर्द्- धनहास्या हयाकृतिः ॥ १३२॥**

**मीनावतारा मीनेशी, गगनेशी हया गजी ।**
**हरिणी हारिणी हार- धारिणी कनकाकृतिः ॥ १३३॥**

विद्युत्प्रभा विप्रमाता, गोपमाता गयेश्वरी ।
गवेश्वरी गवेशी च, गवीशी गविवासिनी ॥ १३४॥

गतिज्ञा गीतकुशला, दनुजेन्द्रनिवारिणी ।
निर्वाणधात्री नैर्वाणी, हेतुयुक्ता गयोत्तरा ॥ १३५॥

पर्वताधिनिवासा च, निवासकुशला तथा ।
संन्यासधर्मकुशला, संन्यासेशी शरन्मुखी ॥ १३६॥

शरच्चन्द्रमुखी श्याम- हारा क्षेत्रनिवासिनी ।
वसन्तरागसंरागा, वसन्तवसनाकृतिः ॥ १३७॥

चतुर्भुजा षड्भुजा च, द्विभुजा गौरविग्रहा ।
सहस्रास्या विहास्या च, मुद्रास्या मुददायिनी ॥ १३८॥

प्राणप्रिया प्राणरूपा, प्राणरूपिण्यपावृता ।
कृष्णप्रीता कृष्णरता, कृष्णतोषणतत्परा ॥ १३९॥

कृष्णप्रेमरता कृष्ण- भक्ता भक्तफलप्रदा ।
कृष्णप्रेमा प्रेमभक्ता, हरिभक्तिप्रदायिनी ॥ १४०॥

चैतन्यरूपा चैतन्य- प्रिया चैतन्यरूपिणी ।
उग्ररूपा शिवक्रोडा, कृष्णक्रोडा जलोदरी ॥ १४१॥

महोदरी महादुर्ग-कान्तारसुस्थवासिनी ।
चन्द्रावली चन्द्रकेशी, चन्द्रप्रेमतरङ्गिणी ॥ १४२॥

समुद्रमथनोद्भूता, समुद्रजलवासिनी ।
समुद्रामृतरूपा च, समुद्रजलवासिका ॥ १४३॥

केशपाशरता निद्रा, क्षुधा प्रेमतरङ्गिका ।
दूर्वादलश्यामतनुर्- दूर्वादलतनुच्छविः ॥ १४४॥

नागरी नागरारागा, नागरानन्दकारिणी ।
नागरालिङ्गनपरा, नागराङ्गणमङ्गला ॥ १४५॥

उच्चनीचा हैमवती - प्रिया कृष्णतरङ्गदा ।
प्रेमालिङ्गनसिद्धाङ्गी, सिद्धसाध्यविलासिका ॥ १४६॥

मङ्गलामोदजननी, मेखलामोदधारिणी ।
रत्नमञ्जीरभूषाङ्गी, रत्नभूषणभूषणा ॥ १४७॥

जम्बालमालिका कृष्ण-प्राणा प्राणविमोचना ।
सत्यप्रदा सत्यवती, सेवकानन्ददायिका ॥ १४८॥

जगद्योनिर्जगद्बीजा, विचित्रमणिभूषणा ।
राधारमणकान्ता च, राध्या राधनरूपिणी ॥ १४९॥

**कैलासवासिनी कृष्ण- प्राणसर्वस्वदायिनी ।**
**कृष्णावतारनिरता, कृष्णभक्तफलार्थिनी ॥ १५०॥**

**याचकायाचकानन्द-कारिणी याचकोज्ज्वला ।**
**हरिभूषणभूषाढ्याऽऽ-नन्दयुक्ताऽऽर्द्रपादगा ॥ १५१॥**

**है-है-तालधरा थै-थै- शब्दशक्तिप्रकाशिनी ।**
**हे-हे- शब्दस्वरूपा च, ही- ही- वाक्यविशारदा ॥ १५२॥**

**जगदानन्दकर्त्री च सान्द्रानन्दविशारदा ।**
**पण्डिता पण्डितगुणा, पण्डितानन्दकारिणी ॥ १५३॥**

**परिपालनकर्त्री च, तथा स्थितिविनोदिनी ।**
**तथा संहारशब्दाढ्या, विद्वज्जनमनोहरा ॥ १५४॥**

**विदुषां प्रीतिजननी, विद्वत्प्रेमविवर्द्धिनी ।**
**नादेशी नादरूपा च, नादबिन्दुविधारिणी ॥ १५५॥**

**शून्यस्थानस्थिता शून्य- रूपपादपवासिनी ।**
**कार्तिकव्रतकर्त्री च, वसनाहारिणी तथा ॥ १५६॥**

**जलाशया जलतला, शिलातलनिवासिनी ।**
**क्षुद्रकीटाङ्गसंसर्गा, सङ्गदोषविनाशिनी ॥ १५७॥**

कोटिकन्दर्पलावण्या, कोटिकन्दर्पसुन्दरी ।
कन्दर्पकोटिजननी, कामबीजप्रदायिनी ॥ १५८॥

कामशास्त्रविनोदा च, कामशास्त्रप्रकाशिनी ।
कामप्रकाशिका कामिन्- यणिमाद्यष्टसिद्धिदा ॥ १५९॥

यामिनी यामिनीनाथ- वदना यामिनीश्वरी ।
यागयोगहरा भुक्ति- मुक्तिदात्री हिरण्यदा ॥ १६०॥

कपालमालिनी देवी धामरूपिण्यपूर्वदा ।
कृपान्विता गुणा गौण्या, गुणातीतफलप्रदा ॥ १६१॥

कूष्माण्डभूतवेताल- नाशिनी शरदान्विता ।
शीतला शबला हेला, लीला लावण्यमङ्गला ॥ १६२॥

विद्यार्थिनी विद्यमाना, विद्या विद्यास्वरूपिणी ।
आन्वीक्षिकी शास्त्ररूपा, शास्त्रसिद्धान्तकारिणी ॥ १६३॥

नागेन्द्रा नागमाता च, क्रीडाकौतुकरूपिणी ।
हरिभावनशीला च, हरितोषणतत्परा ॥ १६४॥

हरिप्राणा हरप्राणा, शिवप्राणा शिवान्विता ।
नरकार्णवसंहर्त्री, नरकार्णवनाशिनी ॥ १६५॥

नरेश्वरी नरातीता, नरसेव्या नराङ्गना ।
यशोदानन्दनप्राण- वल्लभा हरिवल्लभा ॥ १६६॥

यशोदानन्दनारम्या, यशोदानन्दनेश्वरी ।
यशोदानन्दनाक्रीडा, यशोदाक्रोडवासिनी ॥ १६७॥

यशोदानन्दनप्राणा, यशोदानन्दनार्थदा ।
वत्सला कोशला काला, करुणार्णवरूपिणी ॥ १६८॥

स्वर्गलक्ष्मीर्भूमिलक्ष्मीर्- द्रौपदी पाण्डवप्रिया ।
तथार्जुनसखी भौमी, भैमी भीमकुलोद्भवा ॥ १६९॥

भुवनामोहना क्षीणा, पानासक्ततरा तथा ।
पानार्थिनी पानपात्रा, पानपानन्ददायिनी ॥ १७०॥

दुग्धमन्थनकर्माढ्या, दधिमन्थनतत्परा ।
दधिभाण्डार्थिनी कृष्ण- क्रोधिनी नन्दनाङ्गना ॥ १७१॥

घृतलिप्ता तक्रयुक्ता, यमुनापारकौतुका ।
विचित्रकथका कृष्ण- हास्यभाषणतत्परा ॥ १७२॥

गोपाङ्गनावेष्टिता च, कृष्णसङ्गार्थिनी तथा ।
रासासक्ता रासरति- रासवासक्तवासना ॥ १७३॥

हरिद्रा हरिता हारिण्- यानन्दार्पितचेतना ।
निश्चैतन्या च निश्चेता, तथा दारुहरिद्रिका ॥ १७४॥

सुबलस्य स्वसा कृष्ण- भार्या भाषातिवेगिनी ।
श्रीदामस्य सखी दाम- दामिनी दामधारिणी ॥ १७५॥

कैलासिनी केशिनी च, हरिदम्बरधारिणी ।
हरिसान्निध्यदात्री च, हरिकौतुकमङ्गला ॥ १७६॥

हरिप्रदा हरिद्वारा,यमुनाजलवासिनी ।
जैत्रप्रदा जितार्थी च, चतुरा चातुरी तमी ॥ १७७॥

तमिस्राऽऽतपरूपा च, रौद्ररूपा यशोऽर्थिनी ।
कृष्णार्थिनी कृष्णकला, कृष्णानन्दविधायिनी ॥ १७८॥

कृष्णार्थवासना कृष्ण- रागिनी भवभाविनी ।
कृष्णार्थरहिता भक्ता, भक्तभक्तिशुभप्रदा ॥ १७९॥

श्रीकृष्णरहिता दीना, तथा विरहिणी हरेः ।
मथुरा मथुराराज- गेहभावनभावना ॥ १८०॥

श्रीकृष्णभावनामोदा, तथोन्मादविधायिनी ।
कृष्णार्थव्याकुला कृष्ण- सारचर्मधरा शुभा ॥ १८१॥

अलकेश्वरपूज्या च, कुबेरेश्वरवल्लभा ।
धनधान्यविधात्री च, जाया काया हया हयी ॥ १८२॥

प्रणवा प्रणवेशी च, प्रणवार्थस्वरूपिणी ।
ब्रह्मविष्णुशिवार्धाङ्ग- हारिणी शैवशिंशपा ॥ १८३॥

राक्षसीनाशिनी भूत-प्रेतप्राणविनाशिनी ।
सकलेप्सितदात्री च, शची साध्वी अरुन्धती ॥ १८४॥

पतिव्रता पतिप्राणा, पतिवाक्यविनोदिनी ।
अशेषासाधनी कल्प- वासिनी कल्परूपिणी ॥ १८५॥

॥अथ फलश्रुतिः ॥

इत्येतत् कथितं(न्) देवि, राधानामसहस्रकम् ।
यः(फ्) पठेत् पाठयेद्वापि, तस्य तुष्यति माधवः ॥ १८६॥

किं(न्) तस्य यमुनाभिर्वा, नदीभिः(स्) सर्वतः(फ्) प्रिये ।
कुरुक्षेत्रादितीर्थैश्च, यस्य तुष्टो जनार्दनः ॥ १८७॥

स्तोत्रस्यास्य प्रसादेन, किं(न्) न सिध्यति भूतले ।
ब्राह्मणो ब्रह्मवर्चाः(स्) स्यात्, क्षत्रियो जगतीपतिः ॥ १८८॥

वैश्यो निधिपतिर्भूयात्, शूद्रो मुच्येत जन्मतः ।

ब्रह्महत्यासुरापानस्-तेयादेरतिपातकात् ॥ १८९॥

सद्यो मुच्येत देवेशि, सत्यं सत्यं(न्) न संशयः ।
राधानामसहस्रस्य, समानं(न्) नास्ति भूतले ॥ १९०॥

स्वर्गे वाप्यथ पाताले, गिरौ वा जलतोऽपि वा ।
नातः(फ्) परं शुभं स्तोत्रं(न्), तीर्थं(न्) नातः(फ्) परं परम् ॥ १९१॥

एकादश्यां शुचिर्भूत्वा, यः(फ्) पठेत् सुसमाहितः ।
तस्य सर्वार्थसिद्धिः(स्) स्यात्, शृणुयाद् वा सुशोभने ॥ १९२॥

द्वादश्यां पौर्णमास्यां(वँ) वा, तुलसीसन्निधौ शिवे ।
यः(फ्) पठेच्छृणुयाद्वापि, तस्य तत्तत् फलं शृणु ॥ १९३॥

अश्वमेधं राजसूयं, बार्हस्पत्यं(न्) तथाऽऽत्रिकम् ।
अतिरात्रं(वँ) वाजपेय-मग्निष्टोमं(न्) तथा शुभम् ॥ १९४॥

कृत्वा यत्फलमाप्नोति, श्रुत्वा तत्फलमाप्नुयात् ।
कार्तिके चाष्टमीं प्राप्य, पठेद्वा शृणुयादपि ॥ १९५॥

सहस्रयुगकल्पान्तं(वँ), वैकुण्ठवसतिं(लँ) लभेत् ।
ततश्च ब्रह्मभवने, शिवस्य भवने पुनः ॥ १९६॥

सुराधिनाथभवने, पुनर्याति सलोकताम् ।
गङ्गातीरं समासाद्य, यः(फ्) पठेच्छृणुयादपि ॥ १९७॥

विष्णोः(स्) सारूप्यमायाति, सत्यं सत्यं सुरेश्वरि ।
मम वक्त्रगिरेर्जाता, पार्वतीवदनाश्रिता ॥ १९८॥

राधानाथसहस्राख्या, नदी त्रैलोक्यपावनी ।
पठ्यते हि मया नित्यं, भक्त्या शक्त्या यथोचितम् ॥ १९९॥

मम प्राणसमं ह्यन्यत्, तव प्रीत्या प्रकाशितम् ।
नाभक्ताय प्रदातव्यं, पाखण्डाय कदाचन ॥ २००॥

नास्तिकाय विरागाय, रागयुक्ताय सुन्दरि ।
तथा देयं महास्तोत्रं, हरिभक्ताय शङ्करि ॥ २०१॥

वैष्णवेषु यथाशक्ति- दात्रे पुण्यार्थशालिने ॥२०२॥

राधानामसुधावारि, मम वक्त्रसुधाम्बुधेः ।
उद्धृतासौ त्वया यत्नाद्, यतस्त्वं(वँ) वैष्णवाग्रणीः ॥ २०३॥

विशुद्धसत्त्वाय यथार्थवादिने, द्विजस्य सेवानिरताय मन्त्रिणे ।
दात्रे यथाशक्ति सुभक्तिमानसे, राधापदध्यानपराय शोभने ॥ २०४॥

हरिपादाङ्कमधुप- मनोभूताय मानसे ।
राधापादसुधास्वाद- शालिने वैष्णवाय च ॥ २०५॥

दद्यात् स्तोत्रं महापुण्यं, हरिभक्तिप्रसाधनम् ।
जन्मान्तरं(न्) न पश्यन्ति, राधाकृष्णपदार्थिनः ॥ २०६॥

मम प्राणा वैष्णवा हि, तेषां रक्षार्थमेव हि ।
शूलं मया धार्यते हि, नान्यथा मेऽत्र कारणम् ॥ २०७॥

हरिभक्तिद्विषामर्थे, शूलं सन्धार्यते मया ।
शृणु देवि यथार्थं मे, गदितं मयि सुव्रते ॥ २०८॥

भक्तासि मे प्रियासि त्व- मतः(स्) स्नेहात् प्रकाशितम् ।
कदापि नोच्यते देवि, मया नामसहस्रकम् ॥ २०९॥

इति श्रीनारदपाञ्चरात्रे ज्ञानामृतसारे
श्रीराधिकासहस्रनामस्तोत्रं समाप्तम् ।